The M. S. University Oriental Series, No. 9

General Editor
B. J. Sandesara, M.A., Ph.D.
Director, Oriental Institute, BARODA.

THE VIDVAJJANAVALLABHA OF BHOJARĀJA

Edited by
David Pingree, Ph.D.
Oriental Institute,
Chicago (U.S.A.)

Oriental Institute
BARODA
1970

First Edition,
Copies 250
1970

Reprinted from the Journal of the Oriental Institute.

Copies can be had from :—

The Manager,
THE UNIVERSITY PUBLICATIONS SALES UNIT,
M. S. University of Baroda Press (Sadhana Press),
Near Palace Gate, Palace Road,
BARODA.

Printed by Shri Ramanlal J. Patel, Manager, Maharaja Sayajirao University of Baroda Press (Sadhana Press), near Palace Gate, Palace Road, Baroda and published by Dr. B. J. Sandesara, Director, Oriental Institute, Baroda, August 1970.

FOREWORD

It gives me pleasure to publish Dr. David Pingree's edition of the Vidvajjanavallabha of Bhojarāja as No. 9 of the M. S. University Oriental Series. The work was first printed in instalments in the Journal of the Oriental Institute. It is brought out in book-form for the convenience of scholars and research-workers. Numerous Sanskrit works on technical subjects are ascribed to King Bhoja, and I trust that publication of a comparatively less known text like the Vidvajjanavallabha will be welcomed by students of Sanskrit literature in general and Jyotiḥśāstra in particular.

B. J. SANDESARA
Director

Oriental Institute,
Baroda.
Dt. 31-7-'70

THE VIDVAJJANAVALLABHA OF BHOJARĀJA

By

DAVID PINGREE, Chicago, U.S.A.

Numerous are the Sanskrit technical works ascribed to King Bhojarāja (c. 1000-1055)[1] of the Paramāra Dynasty.[2] Among his treatises of jyotiḥśāstra[3] one of the least well known is the *Vidvajjanavallabha*.[4] I here offer an edition of that text which is as close to being critical as the manuscripts at my disposal permit.

Of the fifteen manuscripts of the *Vidvajjanavallabha* listed in catalogues[5] I have been able to consult five: Tanjore D 11604, Tanjore D 11605, GOML

---

[1] The standard account of the career of Bhojarāja is by D. C. Ganguly, *History of the Paramāra Dynasty, Dacca University Bulletin* 17, Dacca 1933, pp. 82-122. The traditional date of his accession has been c. 1010, but recently a somewhat earlier date (c. 999) has been proposed by G. C. Choudhary, *Political History of Northern India from Jain Sources*, Amritsar 1963, p. 96.

[2] For the long list of Bhojarāja's works see T. Aufrecht, *Catalogus Catalogorum*, pt. 1, Leipzig 1891, p. 418; p. 2, Leipzig 1896, p. 95; and pt. 3, Leipzig 1903, p. 90.

[3] Those on astrology include, besides the *Vidvajjanavallabha*:

1. *Bhīmaparākrama*. Not extant.
2. *Bhujabalanibandha*. GOML Madras R 3078 146 ff. is the unique manuscript.
3. *Rājamārtaṇḍa*. There are many manuscripts. An imperfect edition was published by the Śrī Veṅkaṭeśvara Press, Bombay, Saṃ. 1953, Śaka 1818 (A. D. 1896); and lines 1116-1402 were critically edited by P. V. Kane, "From the *Rājamārtaṇḍa* of Bhoja", *ABORI* 36, 1955, 306-339.
4. *Bṛhadrājamārtaṇḍa*. Not extant.
5. *Bhūpālasamuccaya*. Not extant.

Of doubtful attribution to Bhojarāja is:

6 *Vyavahārasamuccaya*. Bombay Univ. 457 67 ff. is the unique manuscript.

For these six works see P. V. Kane, "King Bhoja and his Works on Dharmaśāstra and Astrology", *JOR Madras* 23, 1953-54, 94-127.

On astronomy Bhojarāja is the author of:

1. *Rājamṛgāṅka*. The epoch of this karaṇa is Śaka 964 (A. D. 1042). There exist a number of manuscripts.

It is also stated by Mahādeva in his commentary on Śrīpati's *Ratnamālā* that the lost *Ādityapratāpasiddhānta* was written by Bhojarāja. Finally, Kerala Univ. 5191 (4849) 200 granthas is a manuscript containing a *Grahabhāṣya* attributed to Bhojarāja.

[4] Kane, *JOR Madras* 23. 1953-54, 126-127 hoped to write a separate paper on it once he had secured some manuscript (s), but, so far as I am aware, he has never been able to carry out this wish.

[5] These are:

1. PL, Buhler 445. 19 ff. Saṃ. 1618 (A. D. 1561). Ascribed to Vallabha. Its present location is unknown.

Madras D 13994, and GOML Madras R 2596 (b) through transcripts, which I designate respectively A, B, C, and E [6], and Florence BN 306, which I call D, through a photostatic copy. C and D represent a short version (perhaps the original one) of ten chapters containing in all 100 verses (in D.) The first ten chapters in E also contain 100 verses, but they do not coincide with those in D; these chapters in AB contain 105 verses. A, B, and E add eight chapters to the first ten; it is worthy of note that older authorities are cited only in these later chapters: Parāśara in 11, 1; Kāśyapa in 12, 3 and 13, 2; and Garga in 13, 1. A and B, which share a common lacuna in chapters 16 and 17, are clearly descended from a single archetype; this edition generally follows these two manuscripts as they preserve the fullest text.

It is not my purpose here to present a thorough investigation of Bhojarāja's sources. But it should be noted that several verses of the *Vidvajjanavallabha* are borrowed from Bādarāyaṇa's *Praśnavidyā*.[7]

---

2. Dharwar 706 (696). 19 ff. Śaka 1594 (A. D. 1672).
3. Anup 5145. 13 ff.
4. Anup 5146.10 ff. Indentical with Bikaner 753. 10 ff.
5. Anup 5147. 4 ff.
6. Anup 5148. 4 ff.
7. BORI 337 of 1882/83. 10 ff. From Gujarat.
8. Florence BN 306. 11 ff.
9. GOML Madras D 13994. 11 pp.
10. GOML Madras R 2596 (b). ff. 40-49.
11. Gujarat Vidyā Sabhā 2920 (4181). ff. 2 and 4-10.
12. L. D. Institute 7357 (4076). 12. ff.
13. Sarasvatī Bhavana, Benares 37132. Ff. 17-30, 33-35, and 37-51 (sic).
14. Tanjore D 11604. 14 ff.
15. Tanjore D 11605. 18 ff.

[6] A. A copy of MS. D 11604 (B 4228) in the Sarasvatī Mahāl Library, Tanjore 40 pp., of which pp. 1-2 and 40 are blank. Copied by M. Ramamoorty on 30 April 1965, and collated by Ramanujatatachariar on 1 May 1965.

B. A copy of MS. D 11605 (B 4 4229) in the Sarasvatī Mahāl Library, Tanjore. 40 pp., of which pp. 1-2 are blank. Copied by N. Ranganathasastri (in May 1965) and collated by W. Devanathachi on 20 May 1965.

C. A copy of MS. D 13994 in the Government Oriental Manuscripts Library, Madras. 11 pp. Copied by K. N. Krishna Sarma in 1965, and collated by C. N. Subramania Sastry and K. N. Krishna Sarma.

E. A copy of MS. R 2596 (b) in the Government Oriental Manuscripts Library, Madras. 30 pp. Copied by C. N. Subramania Sastry on 14 Nov. 1966, and collated by another śāstrin (whose signature is, unfortunately, illegible) and C. N. Subramania Sastry.

I wish to take this opportunity to express my graditude to the authorities and scribes of these two libraries for their invaluable assistance to me.

[7] I have referred to Poleman 5032 (Harvard 1104) 20 ff. Śaka 1563 (A. D. 1641) and to BORI 837 of 1887/91. 12 ff. Saṃ. 1931 (A. D. 1874).

Praśnavidyā	*Vidvaịjanavallabha*
42	3,7
30	10.6
40-41	14,5-6
24-28	17, 16-21

The only quotations from the *Vidvajjanavallabha* that I have yet located are found in the *Jyotirnibandha* which was written by Śivarāja between 1400 and 1480[8]. Of the three verses which he quotes as being from the *Vidvajjanavallabha* one[9] is identical with 1, 4 in the text here edited. The remaining two[10] are:

जन्मसमयोत्थफलतो यात्राकालोत्थितं न बलवत् ।
यात्राकालोत्थं च प्रश्नफलं दुर्बलमुशन्ति ॥

and

एषां तु फलविरोधे विमृश्य सम्यग्बलाबलं स्वधिया ।
पौर्वापर्यं फलयोर्वाप्यत्वं वा फलं वाच्यम् ॥

[8] S. L. Katre, "Sivadāsa's *Jyotirnibandha:* the Work and its Date", *NIA* 5, 1942-43, 275-279.

[9] *ASS* 85, Poona 1919, p. 183.

[10] *Ibid.*, p. 206.

श्रीमोरेश्वराय नमः ॥

यस्य भृङ्गावली कण्ठे धृतदानाम्बुभूषिते ।
भाति रुद्राक्षमालेव स नः पायाद्गणाधिपः ॥ १ ॥

भूतं च भावि च भवच्च भवत्स्वरूपं
वेत्त्येव यः करतलामलकानुसारि ।
देवं तमिन्दुकलिकाकलितावतंस-
मत्यद्भुतैकविभवं विभुमानतोऽस्मि ॥ २ ॥

अथाभिदध्मः परिपृच्छतां स्फुटं शुभाशुभं प्रश्नविलग्नतो नृणाम् ।
ग्रहैः शरीरादिकभावसंश्रितैर्गमागमाद्याखिलकार्यगोचरम् ॥ ३ ॥

संप्रेर्यमाणो ह्यवशः शरीरी प्रसह्य दैवेन शुभाशुभेन ।
ज्योतिर्विदः संनिधिमेति यस्मात्प्रश्नोऽप्यतो जन्मसमः फलेन ॥ ४ ॥

सुखचरणगतावतीवरम्ये फलकुसुमद्रुमशालिनि प्रदेशे ।
जलवति धृतगोमयार्द्रफेने भवति शुभं ध्रुवमेव पृच्छकस्य ॥ ५ ॥

Testimonia :

4 is quoted by Śivarāja in *Jyotirnibandha*, p. 183.

Apparatus :

Benediction: अप्रमेयस्वामिने नमः शुभमस्तु—मङ्गलानि भवन्तु C, श्रीगणेशाय नमः D, श्रीगणपाय नमः E.

1 १-२ *om.* D, *om.* CE, भृतदाना° AB.

2 भाव्यपि च यच्च भवत्स्वरूपं C, जगत्स्वरूपं E, सत्येव E, °मलकक्रमेण CE, तमिन्दुशकलेन कृतावतंसं E, भवमानतो ABE.

3 अथाभिदध्नः A, अथ प्रवक्ष्ये E, परिपृच्छ्यतां C, शुभाशुभं स्फुटं AB, ग्रहैश्च होरादिक° E, °संश्रयै° AB, °कार्यगौरवं C, °भावगोचरं D.

4 4 *om.* C, संप्रेक्ष्यमाणस्त्ववश° E, ज्योतिर्वेदः A, °मेत्य तस्मात् Śivarāja.

5 °वतिरम्ये E, °कुसुम° *om* E, °शालिनी A, धृतवति C, जलगोमयार्द्रफेने C, घृतगोमयार्द्रफेने D, धृतगोमर्द्रफेने AB, मृदुगोमयार्द्रफेने E, ध्रुवं शुभमेव A, शुभं खलु पृच्छकस्य पुंसः E.

माङ्गल्यद्रव्याणां दर्शनमाकर्णनं तथालपनम् ।
पृच्छा चादरयुक्ता सिद्धिमभीष्टस्य विदधाति ॥ ६ ॥

अङ्गुष्ठकर्णवदनस्तनहस्तनासा-
कक्ष्यंसपादतलगल्लशिरांसि गुह्यम् ।
ओष्ठं च संस्पृशति वक्ति शुभानि यद्वा
प्रष्टा तदा कलयति ध्रुवमिष्टसिद्धिम् ॥ ७ ॥

केन्द्रत्रिकोणोपगतैः शुभाख्यैः पापैस्तथा कण्टकरन्ध्रमुक्तैः ।
ब्रूयान्नराणामखिलार्थसिद्धिं विपर्ययः स्यात्पुनरन्यथा तैः ॥ ८ ॥

शुभाः स्मरायत्रिसुतेषु लब्ध्यै पापाः पुनर्नेष्टफलाः प्रदिष्टाः ।
नृराशयः कुम्भतुलानृयुग्मकन्या शुभं तेषु वदेद्विलग्ने ॥ ९ ॥

स्थानदाः स्मरनभोगताः शुभा लग्नधीधनयुजोऽर्थमानदाः ।
नेष्टदाः स्युरशुभा व्ययायगा लग्नेन्दुरशुभः शुभोऽम्बरे ॥ १० ॥

लग्नाधिपे केन्द्रगतेऽस्य यद्वा मित्रैर्वियुक्तेऽप्यशुभैर्नभोगैः ।
व्ययाष्टकेन्द्रेषु शुभैस्तु सिद्धिस्तथा त्रिषष्ठायगतैश्च पापैः ॥ ११ ॥

Apparatus :

6 मंगल्य° D, °माकर्ण्य शान्तितो लभते E, तथालभनं D, प्रष्टा C, बादनयुक्ता D, °युक्तस्तत्सिद्धि° C, सिद्ध° AB, पृष्टमभीष्टफलं E.

7 °कर्णकदन° A, °नासिका° AB, °कक्ष्यंस° B, °तलगण्ड° CD, °गलगण्ड° E, नाभिं च C, संस्पृशति च वक्ति D, कथयति D, स्फुटमिष्ट° C.

8 शुभार्यैः E, कण्टककेन्द्रयुक्तैः E, विपर्यये C.

9 शुभास्तथाय° E, स्पुरायत्रिधनेषु C, लब्धैः ABE, लब्धाः D, न राशयः A, नृराशयः C, °युग्माः D.

10 समरभोगगाः C, शुभाः शुभा D, °धनजुषो C, ऽपि मानदाः AB, व्ययायगा D, व्ययाष्टगा C, शुभे D.

11 केन्द्रगतो C, ऽस्य यद्वा *om.* C, मित्रे वियुक्ते AB, मित्रेण युक्ते E, मित्रे थ युक्ते D, मित्रे विमुक्तैरशुभैर्नभोगैः C, त्वशुभै° D, व्ययाप्त° E, शुभैश्च E, शुभस्य C.

इन्दौ द्विषष्ठत्रिमदायस्वस्थे जीवेक्षिते स्याच्छुभमङ्गनोत्थम् ।
पापास्त्रिधर्मोदयरन्ध्रधीषु कार्यार्थहान्यै शुभदाः शुभाः स्युः ॥ १२ ॥

उदयगं शशिनः सुतमीक्षते हिमरुचिर्यदि वा खचरः शुभः ।
विजयभूरिधनर्द्धिमिहादिशेदशुभमत्र पुनर्न भविष्यति ॥ १३ ॥

सितरुचिं हिमगोरथवा सुतं यदि विलग्नगतो भृगुनन्दनः ।
समवलोकयति स्त्रियमुत्तमां श्रियमसौ नियतं लभते तथा ॥ १४ ॥

पीयूषांशौ पापयुक्ते सिते वा स्त्रीभिः सार्धं विग्रहः कीर्तनीयः ।
पापैर्यद्वा मन्मथस्थानयातैस्तैरेवाम्बुस्थानगैर्वा स वाच्यः ॥ १५ ॥

उदये यदि क्षितिसुतो भृगुजं प्रविलोकयेद्वनितया कलहम् ।
कथयेदथार्कतनयश्च वदेद्युवतेस्तथा स यदि गर्भहतिम् ॥ १६ ॥

अरुणं विलोकयति केन्द्रगतं तपनात्मजो भवति चोरभयम् ।
विपदङ्गनाभिरथवा कलहस्तु महान् प्रजायत इति प्रवदेत् ॥ १७ ॥

नाशोऽर्थस्य व्याधयो भीतिरुग्रा पश्यत्युष्णज्योतिषं सूर्यपुत्रे ।
लग्नस्थे वा पङ्कजानामधीशे निःसन्दिग्धं वाच्यमेतत्समग्रम् ॥ १८ ॥

Apparatus :

12 द्विषट्भ्रातृमदा° C, °संस्थे D, जीवेसिते D, °मंगलार्थम् C, °धर्मोदररंध्र° A, कार्यहान्यैः AB, कार्यार्थहानि E, भयदा E, शुभाश्च E.

13 उदगं D, उदयगमशशिनः C, °मीक्षिते E, हिमरुचिं D, वाप्यपरः शुभः C, खचरोऽशुभः D, °भूति° E, °धनाप्ति° CDE, °मिह AB, दिशेन्न च शुभं (शुभः E) पुनरत्र ABDE.

14 सितरुचं E, हिमरुचिं C, °गतं CE, लभते नियतं C, तदा CDE, नया A.

15 स्थिते E, क्षिते C, कीर्तिनाशः E, °स्थानयुक्तै° E, ऽथवाच्यम् C, स चास्य D, वाच्यः *om.* A.

16 प्रति° E, प्र° *om.* AC, काययेद° A, कथयत्य° E, °तनयोऽस्य CDE, °स्तदा D.

17 अरूपं A, केन्द्रगतं]भूमिसुतं C, चौरभवा D, निजवल्लभादिरथवा C, कलहः सुमहान् CDE, प्र° *om.* D, प्रजापतिं B, प्र° *om.* A.

18 अंशो C, र्थ-वराधयो A, पश्यत्युग्र° E, भानुपुत्रे CD, भानुपुत्रः E, लाभस्थे C, निःसंदग्धं A, सत्यमेतत् E, समस्तम् C, समस्तं D.

मैत्रीकार्यं वृद्धिमर्थं जयं वा मित्रक्षेत्रे वीक्ष्यमाणः करोति ।
निःसन्दिग्धं खेचरः पृच्छकस्य व्याचष्टे च प्रायशो नष्टलाभम् ॥ १९ ॥

लग्नवर्तिनि शुभग्रहवर्गे सौम्यखेचरयुतेऽथ विलग्ने ।
निश्चयेन विषयान्तरलब्धिं प्रष्टुरिष्टमखिलं प्रवदेच्च ॥ २० ॥

स्थानभ्रंशोऽर्थक्षयः शत्रुवृद्धिर्वित्ताप्तिः शत्रुवर्गे नराणाम् ।
सार्धं मित्रैः प्रीतिनाशश्च तद्वन्निःसन्दिग्धं तद्विदा वाच्यमेव ॥ २१ ॥

गुरुसितौ यदि युग्ममधिष्ठितौ क्षितिसुतस्तु नभस्युदये बुधः ।
विजयराज्यधनानि तथा स्थितिं नियतमेव तदा लभते नरः ॥ २२ ॥

भवति लग्नगतस्त्रिदशार्चितो दिनपतिर्दशमे लभते तदा ।
विजयराज्यधनान्यधिकान्यसौ निखिलमन्यदपि ध्रुवमीप्सितम् ॥ २३ ॥

दिनकरेऽम्बरवर्तिनि लग्नगे सुरगुरौ हिमभासि सुखस्थिते ।
मदनवेश्मगते यदि वा पुमान् स यदि वित्तमशेषमवाप्नुयात् ॥ २४ ॥

उदयेऽस्तमये शुभयोः स्थितयोः सहजाम्बरवर्तिभिरप्यशुभैः ।
प्रणमन्त्यरयो लभते च तथा बहुसारवदर्थचयं पुरुषः ॥ २५ ॥

Apparatus :

19 मैत्रं कार्यं C, सिद्धिमर्थं E, च E, मित्रक्षेत्रं CDE, वीक्षमाणः CD, निःसंदेहं CD, पृथकस्य A, चेत् A.

20 शुभग्रवर्गे D, लग्ने A, °लब्धं E, पृष्टु° D, द्रष्टु° E, प्रवदेत्सः E.

21 र्यक्षयः A, °र्वित्तानाप्तिः BC, मित्रैः सार्धं C, प्रतिनाशश्च A, प्रीतिनाशं च C, तद्वनि° ABDE, °स्संशितिरस्त° C, °द्विधो वाच्य एव E, °मेतत् C.

22 लग्नमधि° E, क्षितिसुतश्च D, विजयभूरि° E, लभते तथा E, नरः]शुभम् E.

23 यदि विलग्न° D, यदि पृच्छतो भवति लग्न° C, °मान्यमपि D, °मीप्यते D, ध्रुवमीप्सितम् *om.* C.

24 °गतो C.

25 उदयास्तमये D, उदयास्तमय° CE, स्थितयोः शुभयोः CDE, **प्रणमंसयोरे** D, **प्रशमन्त्यरयो** C, तदा CE, °सारमथार्थचयं C, °सारमर्थसचयं D, °मानमयं नियतं E.

उद्गच्छन्तं यद्यनुष्णांशुपुत्रं पापः पश्यन्मध्यवर्त्यम्बरस्य ।
स्थानभ्रंशं मृत्युमर्थप्रणाशं पुंसां किं नातङ्कमुग्रं विधत्ते ॥ २६ ॥

पूर्वे लग्ने यद्यमुष्मिन् शुभाख्यस्तिष्ठत्येको धीगतो धर्मगो वा ।
पृच्छाकाले स्थानमर्थं तदानीं मानं चास्मिन्निर्दिशेत् पृच्छकस्य ॥ २७ ॥

पृष्ठोदये स्याद्यदि धर्मसंस्थः पापो भवेदात्मजसंस्थितो वा ।
नाशस्तथा क्षिप्रमिहास्ति नूनमितोऽपसर्पेति वदेत्तदानीम् ॥ २८ ॥

द्वादशे यदि भवन्ति विलग्नाल्लाभधाम्नि यदि वा स्युरसौम्याः ।
कार्यघातमखिलार्थविनाशं भ्रंशमस्य वितरन्ति तदानीम् ॥ २९ ॥

लग्नाद्वृद्धिस्थानमानादि कुर्याद्वित्तप्राप्तिः खेचरेन्द्रो जयं च ।
कीर्तिं शुभ्रां विक्रमस्थश्चतुर्थो दद्यादर्थं वाञ्छितं पृच्छकस्य ॥ ३० ॥

हिबुकगः कुरुते धनसंक्षयं धनगतो विदधाति च बन्धनम् ।
रुजमिहैव करोत्यशुभग्रहो व्ययविलग्नगतो मरणं नृणाम् ॥ ३१ ॥

शस्त्राग्निसर्पान्वितमीक्षते चेद्द्रेक्काणमम्भोरुहबन्धुजन्मा ।
मध्याह्न उर्वीतनयोऽथ चैनं ब्रूयात्तदानीं ध्रुवमग्निभीतिम् ॥ ३२ ॥

Apparatus :

26 लग्नस्थाने D, °शुमूर्तिं CDE, °मर्थस्य नाशं E, पुंसां *om.* AB, वातङ्क° ABE, चातक° D, शोकमुग्रं AB.

27 आये लग्ने C, शीर्षोदये AB, यद्यमुष्मा छुभाख्य° D, यद्ययुग्मे शुभाख्ये C, तिष्ठेदेको C, धर्मतो A, पृच्छकाले A, नूनं वास्मि° E.

28 पृष्ठोदयः E, षष्टोदये A, °संश्रितो वा D, संस्थि वो A, नाशस्तदा D, नाशस्तव CE, क्षिप्रहा...स्ति E, वदेत्तदाशु CD.

29 लग्नभाल्लाभ° C, कार्यनाशम° E.

30 लग्नाद्वृद्धि° A, °मानानि CDE, वित्तप्राप्तः कुर्यात् CD, °प्राप्तिं E, कीर्तिंश्शुभ्रा E, °श्चतुर्थे E.

31 च *om.* E, रुचमिहैव A, शुभमिहैव E, करोति अशुभ° A, मृणां A.

32 सर्पाग्निशस्त्रा° CDE, °मीक्षिते AB, च C, कथंचिदुर्वी° C, य A, ऽपि C, वैनं E, °त्तदा निश्चितम° CDE.

दिनकरो भयमर्कसुतो रुजं क्षितिसुतो विदधाति च घातनम् ।
विकलतां यदि वा मरणं नृणामुदयगः कुरुते मृगलाञ्छनः ॥ ३३ ॥

वस्त्रार्थस्त्रीलाभमभ्यर्च्यैः सुराणां दद्याद्धावोत्थं फलं चन्द्रजन्मा ।
पुण्यस्त्रीणां सङ्गमं सिद्धिमिष्टामर्थस्याप्तिं भार्गवः सन्निधत्ते ॥ ३४ ॥

स्थानं पूजा धर्मवर्गादिवृद्धिः सौख्यं लाभः श्रीजयश्च स्त्रियश्च ।
एतत्सर्वं निर्दिशेन्मूर्ध्नि लग्ने निःसन्दिग्धं पृच्छतः पृच्छकस्य ॥ ३५ ॥

पश्यत्येकश्चेच्छुभेषु स्वमुच्चं लग्नप्राप्तः खेचरः प्रश्नकाले ।
स्थानैश्वर्यार्थोच्छ्रयो मानवृद्धिर्वाच्या निःसन्दिग्धमेवात्र तज्ज्ञैः ॥ ३६ ॥

यदि विलग्नगमुच्चगतं ग्रहं समवलोकयति ग्रह उच्चगः ।
भवति तत्समये समुपेयुषः स यदि राज्यमिति प्रवदेत्तदा ॥ ३७ ॥

आरोग्यस्य प्राप्तिमर्थस्य लाभं वादे जैत्रं सङ्गमं च प्रियेण ।
सौम्याः केन्द्रस्थायिनः खेचरेन्द्राः कुर्वन्त्यन्ये त्वन्यथा सर्वमेतत् ॥ ३८ ॥

इति श्रीभोजराजविरचिते विद्वज्जनवल्लभाख्ये लाभालाभाध्यायः प्रथमः ॥

Apparatus:

33 भयकर्मसुतो C, भयर्कपुतो A, रुजां E, °धात्यभिघातनम् E, °धात्यसिघातनं D, बन्धनं C, विकलितां AB, शशलांछनः CE, शशिलांछनः D.

34 °मीज्यः सुराणां D, °मर्यो नराणां E, °मुच्चैर्नराणां C, दद्याद्दादं चोर्जितं C, पण्यस्त्रीणां BCDE, °मिष्टार्थस्याप्तिं A, °रिष्टस्यार्थस्याचष्टे E, °मिष्टां लग्ने चाद्ये वा D, भृगोर्नन्दनश्च DE, °मिष्टां स्त्रीलाभं च स्त्रीचयं च श्रियं च C.

35 *om.* C, 35°वर्गाधिवृद्धिः E, °वृद्धि A, सिधिं D, श्रीजयः सुस्त्रियश्च D, °न्मूर्धलग्ने D, °त्पूर्वलग्ना E, पृच्छकः E, पूरुषस्य D, पूरणस्य E.

36 यस्यत्येक° A, °भानां C, समग्रं C, मुच्चं A, लग्नप्राप्तं E, °श्वर्यं स्यादथो D, °श्वर्यसुप्रिया E, रूपवृद्धि° E, °वाच्याः स्युर्निस्सं° E, निस्संदेहमे° CD, °वागुर्वी D.

37 cdab E, तत् *om.* E, समपेयुषः A, च समीपुषः D, राज्यमि प्र° A.

38 आरोग्यप्राप्ति° E, प्रतिमर्थस्य A, वा दौर्जित्यं C, जैत्यं DE, प्रियाणां D, क्रमेण E, कुर्वन्त्येव D, कुर्वन्त्यन्यैस्त्वन्यथा E, सर्वमन्ये D.

col. श्री° *om.* E, श्रीभोजराजविरचिते *om.* CD, श्रीविद्व° C, °वल्लभे E, वल्लभाया C, विद्वज्जनवल्लभाख्ये *om.* D, लाभालाभनिर्णयो नाम C, शुभाशुभाध्यायः E, प्रथमोऽध्यायः C, प्रथमः समाप्तः D, गोपालकृष्णाय नमः add. C.

पापैः सुतारातिगतैर्नभोगैर्निवर्तते मार्गत एव शत्रुः ।
चतुर्थवेश्मोपगतैः पुनस्तैः प्राप्तोऽप्यरातिर्भजते निवृत्तिम् ॥ १ ॥

क्षितिसुतो यदि वा रविनन्दनः सुखगतः कमलिन्यधिको(पो)ऽपि वा ।
रिपुबलं न समेति तदा बुधत्रिदशपूज्यसितैः पुनरन्यथा ॥ २ ॥

स्थिरगते शशभृत्युदये चरे भवति नागमनं द्विषतो यदा ।
नियतमागममस्य तदा वदेदिति विपर्ययतस्तु विपर्ययम् ॥ ३ ॥

व्ययत्रिपञ्चद्विषडेकवर्तिनो भवन्ति लग्नादशुभग्रहा यदि ।
तदा समागच्छति विद्विषां बलं चतुर्थराशौ न समागमं विदुः ॥ ४ ॥

स्थिरे मिश्रेऽथवा लग्ने सिताभासि द्विसंश्रये ।
सुदूरादागतोऽप्यस्मिन् शत्रुर्मार्गान्निवर्तते ॥ ५ ॥

रिपुश्चरे चन्द्रमसि द्विसंश्रये विलग्नगेऽध्वार्धगतो निवर्तते ।
द्विधा भवत्यागमनं विपर्यये पराजयः क्रूरविलोकिते पुनः ॥ ६ ॥

चतुर्थवेश्मोपगतौ यदार्कचन्द्रौ तदाभ्येति न वैरिचक्रम् ।
गुरुज्ञशुक्रा हिबुके यदा स्युस्तदाशु तस्यागममामनन्ति ॥ ७ ॥
मेषचापवृषकेसरिणश्चेल्लग्नगाः सुखगता यदि वा स्युः ।
खेचरैर्विरहिताः सहिता वा विद्विषोऽभिदधतो विनिवृत्तिम् ॥ ८ ॥

Apparatus :

1 title शत्रुसमागमः E, मार्गतयैव AB, चतुर्थलग्नो° C.

2 खगतः E, कमलिन्यधिपोथवा D, कुनरेन्यदिवापि वा E, रिपुबलं सममेति C, बुधत्रि° AC.

3 °भृद्युदये C, नामनं A, यथा E, निगतमा° A, °गमनस्य CD, °गमनं E, वदेत् भवति यत्र तु योगविपर्ययः D, विपर्ययः C.

4 व्ययद्विपंचत्रि° D, व्ययत्रिपंचत्रि° C, °शुभा यदि ग्रहाः CD, विद्विषो D, तद्द्विषां C, चरे तु राशौ C, तदागमं CDE.

5 *om.* E, ऽसितभासि C, सीतभासि B, शीतभासि D, सीताभासि A, सुदूरमा° AB, सदूरमा° D, °गतस्त° C, °स्मिन्न CD, चारातिर्नि° C, रातिर्विनि° D, order is 6c-d, 7a-b, 6a-b, 7c-d in C.

6 श्चन्द्र° A, विलग्नके D, वार्धगतो E, वार्धमितो C, पराजिनः C, विपर्ययः E, °विलोकने C.

7 चतुर्थलग्नो° C, यदि DE, स्युस्तदा सुतस्या° AB.

8 *om.* C, 8 मेषवाजि° DE, सहितास्वदा E, ऽभिदधे E, विदधते D.

स्थिरराशिगतो विलग्नगः शनिरीड्योऽथ तदा रिपोर्गतिः ।
उदयेऽर्कसितामरार्चिताश्चरराशौ द्विषतस्तदागमः ॥ ९ ॥
गुरुर्द्वितीये यदि वा तृतीये धाम्नि स्थितः स्याद्भृगुनन्दनो वा ।
क्षिप्रं तदा याति बलं रिपूणां तथा प्रवासी गृहमेति चाशु ॥ १० ॥
लग्नाद्राशौ चन्द्रमा यावति स्यात्तावद्भिः स्याद्वासरैरागमोऽरेः ।
लग्नस्येन्दोरन्तरे खेचरश्चेज्जायेतान्यो नैव तद्वाच्यमेव ॥ ११ ॥

इति श्रीभोजराजविरचिते विद्वज्जनवल्लभाख्ये शत्रुगमागमाध्यायो द्वितीयः ॥

अर्कार्कजज्ञासुरपूजितानां चरोदयस्थो यदि कश्चिदेकः ।
गमं तदा क्षिप्रमुदाहरन्ति वक्रोपयातैर्न पुनस्तथेति ॥ १ ॥
चरविलग्नगतः शशिजोऽथवा सुरगुरुस्तपनोऽथ सितोऽपि वा ।
गमनकृत्कथितो विनिवृत्तिदः पुनरसौ स्थिरलग्नगतः पथि ॥ २ ॥
गमनागमने न पृच्छतः स्थिरलग्ने गुरुसौरिवीक्षिते ।
चरखेचरवीक्षिते पुनश्चरलग्ने द्वयमत्र निर्दिशेत् ॥ ३ ॥
स्थितः समग्रोत्तमवीर्ययुक्तो विलग्नतो वेश्मनि यत्र खेटः ।
तत्तुल्यसंख्याप्रमितैर्निवृत्तिरुक्ता प्रयातुर्नियमेन मासैः ॥ ४ ॥

Apparatus :

9 चरराशिगतौ विलग्नगौ गुरु सौरी तु तदा रिपोर्गतिः C, °रीज्यो AD, °रिज्यो E, रिपुस्थितः ABDE, उदयर्क्षगतोऽमरार्चितश्चर° C, उदयेर्क उतामरार्चितश्चर° D, रुदयेऽर्कसुतोऽमरार्चितश्चर° E, द्विषतां DE.

10 धर्मस्थितः E, स्याद्गुरु° B, तदा E, ततः C, ग्रह° AC, वाच्यं D.

11 *om.* C, ॥ स्यात्स्यात्तावद्भिर्वासरै° E, खेचरेंद्रो जा° D.

col. इति *om.* B, श्री° to भाख्ये *om.* BCD, श्री *om.* E, °वल्लभे E, शत्रुगमागमो ध्यायो द्वितीयः A, शत्रुसमागमो ध्यायो द्वितीयः B, शत्रुसमागमो नाम द्वितीय अध्यायः C, शत्रुसमागमाध्यायो द्वितीयः DE.

1 titte गमागमः C, गमनागमने E, अर्कार्कजि° A, °स्थे AB, °यातेन E, पुनस्तमेभी ABD, पुनर्गतोऽस्मि E.

2 प्यसितो D, प्युभयो° C, ऽथवा DE, °द्गतः C, °कृत्वाथितो A, विनिविवृत्तिदः A, स्थिरराशि° D, पथः DE.

3 °गमनं C, न *om.* E, पृच्छताः A. पृ——B, °श्चरराशौ C, °माशु CDE, विनिर्दिशेत AC, विद्यते D.

4 न तुल्य° A, °प्रयितै° C, °रुक्ताथ यातु° E.

काल एष विनिर्देश्यश्चराशकगते ग्रहे ।
स्थिरद्व्यात्मकभावस्ये क्रमाद्द्वित्रिगुणः स्मृतः ॥ ५ ॥

यदा यियासतो लग्नस्मरस्थानपतिर्ग्रहः ।
वक्रं बिधत्ते तं कालमावृत्तेश्च परे जगुः ॥ ६ ॥

तिर्यग्राशिर्यदा लग्नाद्द्वितीयः स्याच्छुभान्वितः ।
तृतीयो यदि वा ब्रूयात्तिरश्चागमनं तदा ॥ ७ ॥

इति श्रीभोजराजकृते विद्वज्जनवल्लभाख्ये गमागमाध्यायस्तृतीयः ॥

लग्नात्सुतार्थसहजेषु खगैर्गतानां दूरात्प्रवृत्तिमथवागममामनन्ति ।
सौम्यैः पुनश्च समवासिमरिस्थितैर्वा लब्धागमं भृगुसुतामरपूजिताभ्याम् ॥ १ ॥

धनसहजगतौ सितामरेड्यौ कथयत आगमनं प्रवासिपुंसाम् ।
सुखनवमगताविमौ च तद्वज्झटिति नृणां कुरुते गृहप्रवेशम् ॥ २ ॥

जामित्रवर्तिन्यथवारिसंस्थे नभश्चरे केन्द्रगतेऽथ जीवे ।
प्रवासिनामागतिरत्र वाच्या त्रिकोणभाजीन्दुसुते सिते वा ॥ ३ ॥

अष्टमे हरिणलक्ष्मणि लग्नात्कण्टकैरपि पापवियुक्तैः ।
प्रोषितः सुखमुपेत्यथ सौम्यैः स्वान् गृहान् भजति लाभसमेतः ॥ ४ ॥

Apparatus :

5 एव AB, विंनिर्दिष्ट° E, °गते गते ग्रहे D, स्थिरह्यात्मक° A, स्थिरेऽध्यात्मक° C, स्थिरयौनक° D, °भाव A, °भागस्थे E, °भागोत्थ° D.

6 लग्नात्स्मर° CDE, चक्रं करोति D, तत्काल° E, °वृत्तेर° DE, °वृत्तेर्न C, विदुः E.

7 तीर्य° B, तिर्यक् प्राणी यदा E, °श्चामागमं C.

col श्री to भाख्ये *om.* BCDE गमागमनाध्या° E.

1 title प्रोषितागमनम् C, दूरप्रोषितागमनम् E, °सहजे सुखगै° AB, दूरप्र° ABCDE, °वृत्तिरथवा° E °मादिशंति D, 1c-d *om.* AB, प्रणष्टसम° DE, मधिष्ठितैर्वा D.

2 °रेड्यौ BD, कथयतश्चाग B, कथतश्चाग° A कथयतदाग° E, कथितमिहाग° D, सुत° C, भवनगता° CDE, तद्व्रजति E, ग्रह° C, °प्रवासं D.

3 °वेश्मन्यथवा° D, °नाथेऽप्यथवा° E, च CE, स D, प्रवासितानां गति° E, त्रिकोणमा° A °जीन्दुयुते C सुधी वा C

4 हरिणि AB, लक्ष्मिणि A, °विमुक्तैः CDE, प्रोक्षितः C, °मुपैति च CD, °गतैरथ E, स्वं गृहं D, ग्रहान् व्रजति C, गृहानटति E, °सामतः D.

दुश्चिक्यस्थैः केन्द्रषष्ठोपगैर्वा पापैः पापालोकिते पृष्टलग्ने ।
सौम्यादृष्टे बन्धनस्थान् मृतान् वा नष्टान् भ्रष्टान् घातितान् वा वदेत्तान् ॥ ५ ॥

लग्नान्मन्दः पापयुग्धर्मसंस्थः सौम्यैर्दृष्टः स्यान्न वा नैव युक्तः ।
देशे तस्मिन् रोगयुक्तं तदानीं ब्रूयान्मृत्युस्थानगो मृत्युमस्य ॥ ६ ॥

विलग्नतो यावतिथे गृहे ग्रहः समाहता द्वादश तेन राशयः ।
दिनानि तावन्ति वदेदिहागतौ निवर्तनं वक्रमुपागतैर्ग्रहैः ॥ ७ ॥

इति श्रीभोजराजविरचिते विद्वज्जनवल्लभे प्रोषितागमागमाध्यायश्चतुर्थः ।

शनीन्दुभौमा यदि लाभवर्तिनस्तनौ गुरुः सूर्यबुधौ त्रिबन्धुगौ ।
भृगुः सुते स्याद्यदि विद्विषस्तदा विजित्य सिद्धार्थ उपैति मन्दिरम् ॥ १ ॥

लग्नस्थिते सुरगुरौ षष्ठे वाशीतरोचिषि ।
दशमे च सुधाधाम्नि प्रष्टुः सिद्धिरनुत्तमा ॥ २ ॥

सिद्धिः स्याल्लग्नगे जीवे षष्ठे शुक्रेऽष्टमे रवौ ।
सचिवाप्तिर्गुरौ लाभे द्युमणौ क्ष्मार्कपुत्रयोः ॥ ३ ॥

Apparatus :

5 दुश्चित्कस्थैः CE, केन्द्रगुणो° AB, °लोकितैः D, षष्ठलग्ने C, °दृष्टैर्बं° D, °पृष्टे बं° AB, A, नष्टान् पुष्टान् AB, नष्टान् मुष्टान् E पुष्टान् मुष्टान् D.

6 लग्नादिंदुः D, लग्नान्न शिवः E, सौम्यैयुक्तः D, सौम्यैर्मुक्तः E, सौम्यैः खेटैः C, स्याद्यदा CD, स्यात्तदा E, नेक्षितश्च CDE, देया AB, ऽप्यस्मिन् E, न्यस्मिन् CD, °युक्तस्तदानीं E, मृत्यं B, मत्यं A, °स्थानगे D, °स्थानगैः C, मृत्युमप्य A.

7 °तिमे E, °ति मे C, °तिःये AB, ग्रहे D, ग्रहः C, गृहः A, गृहं E, भवेदि° D, °गता E, निवर्तते C, °मुपौगतै° A, °मिहागतैः C, ग्रहैः DE, खगैः C.

col. इति *om.* B, श्री to वल्लभे *om.* BCDE, प्रोषितागमनं नाम चतुर्थः C, प्रोषिताध्यायश्चतुर्थः E, महाप्रोषिताध्यायश्चतुर्थः D, आदितः श्लोकाः ६१ add. E.

1 title जयपराजयः C यात्राफलाध्यायः E, गुरुः] भृगुः DE, सूर्यबु D, भृगुः] गुरुः CDE, सुत A, सित C, सिते E, सिद्धार्थमुपैति ABE, मन्दिराम् A.

2. चाशीत° D, चासित° E, °रोचिषी A, बुधे धाम्नि C, पृषुः D.

3. जीवे]भौमौ C, शुक्राष्टमे A, 3b-7 *om.* C, सचिवाप्तगुरौ AB, द्युमणि AB, कर्मणि D, कर्मिणि E.

विदधाति शुभं यियासतां शुभखेटश्चरलग्नसंस्थितः ।
अशुभैरशुभं महर्षयः स्थिरलग्नेष्वशुभं प्रचक्षते ॥ ४ ॥
भङ्गः शनीन्दुभौमेषु धर्मधीलग्नवर्तिषु ।
मृत्युः स्यादुदये भौमदृष्टयोश्चन्द्रमन्दयोः ॥ ५ ॥
मृत्युर्मृगगयोर्भौममन्दयोर्लग्नगे रवौ ।
रवीन्द्वोस्तद्वदेवायं दुश्चिक्यनिधनस्थयोः ॥ ६ ॥
प्रष्टुर्नाशः स्मरस्थैः स्याद्बुधेन्दुवसुधात्मजैः ।
क्षुन्मारश्चारिवृद्धिश्च विलग्ने भृगुभौमयोः ॥ ७ ॥
लग्ने कुजेन्द्वोः षष्ठे च शशाङ्कसुतशुक्रयोः ।
वधः स्यान्मन्त्रिणः सूर्ये निधनस्थानवर्त्तिनि ॥ ८ ॥
प्रष्टुः सुतवधः पापैर्विलग्नात्पंचमोपगैः ।
भङ्गः स्याल्लग्नगे भौमे सेन्दौ मन्दावलोकिते ॥ ९ ॥

इति श्रीभोजराजकृते विद्वज्जनवल्लभाख्ये यात्राफलाध्यायः पंचमः ॥

दशमोदयस्मरगृहोपगाः शुभा नगराधिपस्य विजयप्रदाः स्मृताः ।
नवमे जयाय गुरुशुक्रचन्द्रजाः कुजभानुजावपि च भङ्गदौ स्मृतौ ॥ १ ॥
नागराः सहजवेश्मतः शुभा यायिनश्च नवमाच्छुभग्रहाः ।
खव्ययायगृहवर्तिनः शुभा यातुरेव शुभदा न तिष्ठतः ॥ २ ॥

Apparatus :

4 °लग्नेऽप्यशुभं E, °लग्ने पि शुभं D.

5 भगः D, भग्नः E, लग्नधीधर्म° E, स्याद्युभयोर्भौम° E.

6 *om* D, मृत्युर्मृत्यगयोर्मन्दभौम° E, दुश्चित्कनि° E, दुच्चिक्यानि° AB.

7 प्रष्टुर्वांशः AB, स्मरस्थे E, स्मरस्थः D, °वसुधात्मजाः E, क्षुन्मारशत्रुवृद्धिश्च E.

8 कुजेन्दू C, कुजे च D, वा D, शशांकक्षुत° A, बन्धः AB, सूर्ये]सू A, स्तु B, °स्थाने च वर्तिनि A.

9 पृष्टुः D.

col. श्री° to वल्लभाख्ये *om* BCDE, धात्रा नाम पंचमः C, श्लोकाः ९० add. E .

1 लग्नोदय° C, °स्मरग्रहोपगाः ABC, °प्रदः D, स्मृतः D, मताः C, दशमे C, गुरुशुक्रसोमजाः E, भयप्रदौ मतौ C.

2 *om* E, सहजे D, °वेश्मनः (in marg. षष्ठे इति शेषः) B, *om* AB, नवमः शुभैर्ग्रहैः C, नवमाच्छुभैर्ग्रहैः D, नवमाच्छुभग्रहैः AB, °ग्रह° ABC, °वर्तिनो CD, तिष्ठतो CD.

क्रूरे विलग्नोपगते तृतीये चन्द्रात्मजे तिग्मकरे चतुर्थे ।
युद्धं भवत्येव महीपतीनां पौरस्तु यस्तत्र स नाशमेति ॥ ३ ॥

मनुष्यराशावुदये चरे च क्रूरौ भवेतां यदि खेचरौ द्वौ ।
यायी नरश्चाशु विनाशमेति सौम्यग्रहेऽप्येवमुशन्ति सिद्धिम् ॥ ४ ॥

अनिमिषालिकुलीरघटा यदि स्थितिकृतोऽम्बुनि विद्विषस्तदा ।
निगदितः स्फुटमेव पराजयः स्मृतमपक्रमणं चतुरङ्घ्रिभिः ॥ ५ ॥

लग्ने लाभे कर्मणि द्वादशे वा यद्येकोऽपि स्याद्ग्रहः क्रूरसञ्ज्ञः ।
यायी हन्यात्तत्पुरं यद्यमीषु क्रूरेभ्योऽन्यो नास्य नाशं तदाहुः ॥ ६ ॥

आक्रन्द इन्दुरनिशं दिनमध्यगोऽर्कः
पूर्वाह्ण एव स तु पौर इतोऽन्यदा तु ।
यायी सितारशिखिराहुरयायिसंज्ञा
नित्यं बुधेज्यशनयः कथितास्तु पौराः ॥ ७ ॥

लग्नतो हिबुकतश्च खगेशो जायते दशमभे यदि पापः ।
हन्ति तन्नगरमाशु तदानीं विद्विषां नरपतिर्विजिगीषुः ॥ ८ ॥

उदयतो यदि लाभगतो भृगुर्गुरुरथोष्णकरोऽथ बुधोऽथवा ।
नगरभर्तुरसौ कुरुते तदा विजयमम्बरगस्तु परिक्षयम् ॥ ९ ॥

Apparatus :

3 क्रूरैर्विलग्नोपगतैस्तृतीये D, शीतकरे C, युग्धं A, भवस्यमेव A, पौरप्र° D, यस्तत्र विनाश° CE, °चुस्तत्र विनाश° D, ग्रस्तत्र प नाश° A.

4 मनुष्यराशा उदये C, ऽम्बरे CDE, खेचरेन्द्रौ CD, यायी तरस्याशु तदा विनाशं D, यो याति तस्याशु तदा बिनाशः E, सद्यो विनाशं समुपैति चारिः C, °ग्रहेष्वेव° CDE, सत्तः E.

5 स्थितिकृते AB, स्थितिकृता° E, विद्विषस्तदा A, विद्विषंतां तदा C, धेर्द्विषतस्तदा E, स्फुट एव E, चतुरंगिभिः C.

6 यद्वैकत्र C, मध्येकोऽपि E, स्याद्यदा C, यामीं E, हन्यात्तां पुरं C, °हस्यात्तत्पुरं E, मध्यमेषु E, ऽन्ये CE, नात्र D, यायि° C, तदाशु C.

7 *om* CDE, आक्रन्दु AB, पूर्वाण्ह A, सिताशिखि° A, °राहुन यायि° AB, पौरः A.

8 लग्नते A, लग्नगो C, हिबुकगश्च स्वगेन्द्रो CDE, विद्विषश्च दशमे C, भर्तगरमासु A, भत्ते(तक्ष)गरमाशु B, विद्विषो E.

9 बुधो पि वा C, नगरकर्तुरसौ CE, थवा C, °मंबरगतं त C, परिसया A.

उदयगैर्यदि वा स्मरवर्तिभिर्दशमराशिगतैरथवा शुभैः ।
विजय एव तदा पुरशासितुर्भवति यायिनृपस्य पराजयः ॥ १० ॥

इति श्रीभोजराजकृते विद्वज्जनवल्लभाख्ये जयपराजयाध्यायः षष्ठः ॥

उदये नरराशिगाः शुभा यदि वा स्युर्व्ययवर्तिनस्तदा ।
प्रवदेन्नृपसन्धिमुद्धतां द्विचतुर्थैरशुभैर्विरोधिताम् ॥ १ ॥

सौम्याः सौम्यालोकिताः केन्द्रयाताः पुंलग्नस्थाः प्रीतिमुत्पादयन्ति ।
पापाः पापैर्वीक्षिताः खेचरेन्द्रास्तेष्वेव स्युस्तत्समुच्छित्तिहेतोः ॥ २ ॥

ददाति वित्तं विषयस्थितः स्यात्क्रूरः स्मरक्षेत्रगतः खगेन्द्रः ।
क्रूरैर्विलग्नोपगतैः कृतोऽपि क्षितीशयोर्भेदमुपैति सन्धिः ॥ ३ ॥

संधानमापोक्लिमभाजि सौम्ये शुभेऽथ लग्ने शुभवीक्षिते वा ।
विनैव सन्देहममुत्रयोगे महीपतीनामिति कीर्तयन्ति ॥ ४ ॥

इति श्रीभोजराजकृते विद्वज्जनवल्लभाख्ये सन्धिनामाध्यायः सप्तमः ॥

लग्ने द्वितीये यदि वाष्टमेऽपि पापः परं बिभ्रति सप्तमे वा ।
तदा दिशेद्वाश्रयणीयनाशं प्राणप्रयाणं यदि वाभिदध्यात् ॥ १ ॥

Apparatus:

10 °र्यदि वाऽम्बर° C, °र्यदाम्बर° E, °वर्त्तिर्दश° A, °मधामगतै° E, यायिजनस्य E, पराभवः C.

col. इति *om* C, श्री to वल्लभाख्ये *om* BCDE, जयापजयाध्यायः E, जयापजयो नाम C.

1 वायव्यय° CD, चायव्यय° E, °वर्त्तिनः सदा D, वर्तिनस्तदानीं C, °वर्तिनश्शुभाः E, °मुद्धतं AB, °मुद्यतां D, °मुत्तमं E, द्वितनुस्थै° CDE, °र्विरोधताम् E.

2 स्युस्तत्समुष्ठानहेतुः D, स्यात्सन्धिविच्छित्तिहेतुः E.

3 ददति A, विषये यदा E, विषयी यदि D, विजयी यदि C, स्या B, सौम्यः D, क्रूरे CDE, विलग्नोपगते CD, विलग्नावगते E, कृते D, सिद्धिं C.

4 ऽथ]च CE, वा]च CE, (नु) B, °ममुत्रयोगो C, °मपुत्रयोगे A, °पतीनामपि D.

col. श्री° to °वल्लभाख्ये *om* BCDE, सन्धानाध्यायः E, सन्धिविग्रहनिर्णयो नाम C, आदितः श्लोकाः [२ add. E.

1 –3 *om* C, 1 लग्नाद्द्वि° E, लग्ना(त् in marg.) द्वि° D, ऽपि]त्रा E, °र्क्षे D, पापाः पदं ABE, पापात्पदं C, दिशेदाश्र° DE, प्राणःप्रायाणं A, वाविदध्यात् E, वाभिदध्युः D.

अर्थच्छेदो वित्तगैस्तस्य पापैर्जामित्रस्थैर्विभ्रमं कीर्तयन्ति ।
रन्ध्रस्थानस्थायिभिश्च व्ययसुत्वं तस्मादेनं वर्जयेद्यत्नतोऽर्थी ॥ २ ॥

द्वितीयसप्ताष्टमगैर्विलग्नाच्छुभैर्भवत्याश्रयणीय एव ।
आरोग्यमर्थः सुखसम्पदः स्युः प्रीतिश्च वाच्यैव तयोर्नृपत्योः ॥ ३ ॥

इति श्रीभोजराजकृते विद्वज्जनवल्लभाख्य आश्रयणीयाध्यायोऽष्टमः ॥

अब्जनाथतनयस्य दृकाणे सर्पवेष्टिततनावथ लग्ने ।
चन्द्रसौरसहितेऽथ विलग्ने बन्धनं नियतमाकथयन्ति ॥ १ ॥

ये च संयतपदा हि शृङ्खलापाशजालसहिताः शनीन्विताः ।
तेषु बन्धनमिहादिशेत् स्थिरेष्वात्मदेश इतरेषु चापरे ॥ २ ॥

पापक्षेत्रं संश्रिते धर्मजायाधीरन्ध्राम्बुस्थानगे सूर्यपुत्रे ।
क्रूरैर्दृष्टे खेचरैरस्ति बन्धः क्षिप्रं पुंसां तद्विदा वाच्यमेव ॥ ३ ॥

लग्ने चरे स्यादचिरेण मोक्षः स्थिरेऽप्यसावस्ति परं चिरेण ।
द्विदेहवर्तिन्यहिमांशुपुत्रे कालेन स स्यात्खलु मध्यमेन ॥ ४ ॥

इति श्रीभोजराजकृते विद्वज्जनवल्लभाख्ये बन्धाबन्धाध्यायो नवमः ॥

Apparatus:

2 वित्तगस्तस्य E.

3 °च्छुभं भ° E, °श्रयणीयणीय एव A, आरोग्यवर्चश्शुभसम्पदश्च E, °मर्थाः ABD, °संपदश्च D, वाच्येव D, वाच्यैर° A, वाच्या हि E.

col. *om* C, इति *om* D, श्री° to °वल्लभाख्य *om* BDE, आश्रयणी अध्यायः अष्टमः A.

1 दृगाणे C, लाभौ B, चन्द्रसौरिसहजे E, च CE, नियतमः AC, नियतमाः B, नियमतः DE.

2 *om* CD, येषु संहितपदा AE, °सहितो ऽथ वीक्षिते E, °मिहादिशो A, °मिहापि त° E, स्थितेष्वा° B, °स्तरेठवा° E.

3 पापक्षेत्रे E, पापा क्षेत्रं AB, धर्मजाये E, °रन्ध्रम्बु° AC, क्रूरे दृष्टे D, °रस्त C, पुंसस्त° CDE, °द्विधा C, °द्विदां B, देशनीयं D, देश्यमेतन् E, कथ्यते तत् C.

4 मोक्षा A, प्यसौ वस्ति D, तथा चास्ति C, द्विमूर्ति° E, °वर्तिन्यथवा हिमांशुपुत्रेण AB, कालेन *om* AB, यः स्यात् C, वाच्यः D.

col. *om* B, इति *om* C, भोज° to °वल्लभाख्ये *om* CDE, बंधनमोक्षाध्यायो D, बन्धमोक्षाध्यायो E, बन्धमोक्षौ नाम C, (नवमः) B, अष्टमः C.

सौम्यैः सौम्यालोकितैः खेचरेन्द्रैर्जायालग्नच्छिद्रधीस्थानसंस्थैः ।
प्रालेयांशौ षड्दशायत्रिसंस्थे नित्यं रोगैः पीडितानां सुखं स्यात् ॥ १ ॥

उपचयोपगते हिमगौ शुभैर्नवमपंचमकेन्द्रधनस्थितैः ।
शुभविलोकनगे यदि वोदये भवति रोगयुतोऽपि सुखी नरः ॥ २ ॥

पूर्णः शशाङ्को यदि लग्नवर्ती विलोक्यते चित्रशिखण्डिजेन ।
शुक्रामरेज्यावपि केन्द्रगौ चेत्पीडार्दितः स्यात्सुखितस्तदानीम् ॥ ३ ॥

लग्नस्थो वा नैधनस्थानगो वा पापः प्रष्टुर्लाभवेश्मस्थितो वा ।
व्याध्युद्देशं निर्दिशेद्वर्तमानं यद्वा दुःखस्यातिकष्टं प्रयातम् ॥ ४ ॥

स्वभवनोदयगः कुरुते रुजं मरणकृन्निधने दशमेऽपि च ।
कलिकरः खलु पृष्टविलग्नगो व्ययकरोऽस्य पुनर्व्ययवेश्मगः ॥ ५ ॥

रोगार्तस्य [हि] जन्मर्क्षं पश्यति पापो न तस्य शिवमस्ति ।
लग्नान्निधनगतो वा पृच्छाकाले शुभं हन्यात् ॥ ६ ॥

यदि विलग्नगतं शशिनः सुतं शशधरं यदि वोदयमागतम् ।
समवलोकयतीह शुभस्ततो नियतमेव तदा शुभमाप्नुयात् ॥ ७ ॥

पृष्ठोदये लग्नगते यदि स्युः क्रूराश्च तूर्णं यदि लग्नभाजः ।
निशाकरो रन्ध्रगतस्तदानीं रोगार्दितः प्राणवियोगमेति ॥ ८ ॥

Apparatus :

1 °लग्नाछिद्र° E, °धर्मेछिद्र° C, षट्दशाय° CD, षट्दशय° A, °संस्थै D, रोगव्याधीपी° D, रोगव्यापत्पी° CE, शुभं ACD, शुभः E order of verses 4, 2, 3, 5 in E.

2 उपचयोच्चगते E, शुभे नव° E, °पंचम° *om* E, °धनास्थिते... E.

3 विलोकिते चित्र° AB, विलोकितश्चित्र° D, शीतकरात्मजेन C, for c-d : शुभं भवत्येव नरस्य सद्यः शुक्रामरेज्यावपि केन्द्रगौ चेत् C, °ज्यावथ E, पीडार्दिताः E, स्युरसुखिनस्त° E.

4 लग्नस्थे C, स्थानगे C, पापे C, C ends द्रष्टुलग्नवे। एतावानेव भागो मातृकायां वर्तते ॥ व्याध्युद्भेदं E, व्याध्युकेदं D, दुखं शनिकष्टं E, प्रयाति E, order of verses 6, 5 in D.

5 स्वभुवनो° D, मदने थवा D, मदने तथा E, पृच्छकलग्नगो DE.

6 *om* E, हि AB, च D, लग्नाभिधन° A, लग्नांत्यधन° D.

7 शुभे ABDE, ततो AB, °तरो DE, रुजमादिशेत् DE.

8 लग्नगता E, यदा E, क्रूराश्चतुर्थे यदि E, क्रौराश्चतुर्थास्त्वथ D, तुर्णां AB, लग्नभाजि E.

गृध्रकोलवदना भुजगेन्द्रैर्वेष्टिता यदि भवन्ति दृकाणाः ।
क्रूरतामथ गते सितरश्मौ रन्ध्रभाजि मरणं कथयन्ति ॥ ९ ॥
मरणमाशु करोत्यशुभैः कृता दुरधरा चतुस्रमधिष्ठिता ।
बलयुतैरशुभैरवलोकिते शशिनि गात्रभवाः कुरुते रुजः ॥ १० ॥
सौम्यादृष्टः सूनुरम्भोजबन्धोर्यं यं राशिं चारतोऽसौ हिनस्ति ।
हन्ति क्रूरालोकितस्तस्य तस्य क्षिप्रं प्राणान् रोगिणोऽरोगिणो वा ॥ ११ ॥
लग्ने लाभे सप्तमे पंचमे वा शत्रौ धर्मे कर्मभे विक्रमे वा ।
सौम्या रोगस्याशु कुर्युर्निवृत्तिं पापाः पुंसः पञ्चतामामनन्ति ॥ १२ ॥

इति श्रीभोजराजकृते विद्वज्जनवल्लभाख्ये रोगिणोऽरोगिणोऽध्यायो दशमः ॥

सितेन्दुयुक्तेषु तदीक्षितेषु [वा] कुलीरगोतौलिषु जायते नरः ।
कुमारिकालाभ इति प्रचक्षते पराशराद्याः प्रथमे महर्षयः ॥ १ ॥
युग्मर्क्षगौ दानवराजपूज्यसुधामयूखौ द्विपदाङ्गनांशे ।
वीर्यान्वितौ लग्नमवेक्ष्यमाणौ कुमारिकालाभकरौ प्रदिष्टौ ॥ २ ॥
लग्ने यदि स्याद्युवतेस्त्रिभागस्तत्रापि च स्याद्यदि योषिदंशः ।
दृष्टः सितेनामृतरोचिषा च भवेत्तदासौ वनिताधिकारी ॥ ३ ॥

Apparatus :

9 गृध्रगोलपदा E, क्रूरतां यदि E, क्रौरतां परि° D, शितरश्मौ D.

10 कृतो E, धुरूधरश्चतुरमधिष्ठितैः E, बलयुतैश्च E, बलयुतैष्व° D, शशि D, गात्रभवां E, रुजम् E.

11 सुरम्भोजबन्धोऽर्थं AB, सौरिणासौ E, क्रौरा° D, तस्य *om*. A, प्राणान् क्षिप्रं E, पुंसः क्षिप्रं D, रोगिरोगिणो वा A.

12 पंचमे सप्तमर्क्षे E, वा²] च DE, पुंसां E, °मानयन्ति DE.

col. भोज° to °वल्लभाख्ये *om* BE, श्रीमहाराजाधिराजश्रीभोजराजविरचिते प्रश्नचिन्तामणौ विद्वज्जनवल्लभाभिधाने D, रोगिणो रोणो ध्यायो A, निरोगाध्यायो D, रोगाध्यायो E, संपूर्णः समाप्तोयं ग्रन्थः add. D, आदितः श्लोकाः १०० add. E.

1 वा *om* ABE, नृणां ABE.

2 °पूज्यौ E, °मयुखौ A, द्विपदङ्गनानाम् E, °मवेक्षमाणौ E.

3 °वतित्रिभाग° E, °भागतत्रापि A, च] स E, वा E, वनिताभिकारी A, वनिताभिकारि B, वनिताप्तकारी E, 4-5 *om* E.

जामित्रवेश्मोपगतो विधत्ते दृष्टः शशाङ्कः सुरपूजितेन ।
स्त्रीलाभमिष्टं सहितश्च पापैर्दृष्टो ऽथवा तैस्तमसौ निहन्ति ॥ ४ ॥
केन्द्रत्रिकोणोपगताः स्वरर्क्षं शुभस्य सोम्याः प्रविलोकयन्ति ।
यदा तदासौ लभते सुरूपां विरूपरूपामपि पापधिष्ण्ये ॥ ५ ॥
स्त्रीराशिस्था ग्रहा लग्नस्थितं योषिद्ग्रहांशकम् ।
पश्यन्तः कन्यकालाभकारिणः स्युरसंशयम् ॥ ६ ॥
वरलाभोऽपि कन्यानामेवं स्यादिति सूरयः ।
परं पुरुषदृक्काणैः पुंसोंऽशैः पुंग्रहैरपि ॥ ७ ॥
विलग्नतः समस्थानस्थिते तपनजन्मनि ।
लभ्या वरस्य नारी स्याद्विपरीतमतोऽन्यथा ॥ ८ ॥
लग्नतोऽरिमदधीसहजायेष्विन्दुरर्कभृगुभूसुतदृष्टः ।
स्यात्करग्रहकरो वनितानां केन्द्रधर्मसुतभेष्वथ सौम्याः ॥ ९ ॥

इति श्रीभोजराजकृते विद्वज्जनवल्लभाख्ये कन्यालाभाध्यायः एकादशः ॥

वृषकेसरिकन्यकालिनः सुतधामाश्रयिणो भवन्ति चेत् ।
उदयाच्छशिनोऽथवा तदा तनयाल्पत्वमुपैति पृच्छकः ॥ १ ॥
पुत्रस्थाने वीर्यभाजि ज्ञशुक्रस्वर्नाथेज्यस्वाधिपैर्युक्तदृष्टे ।
प्रष्टुः पुत्राः सन्ति दीर्घायुषो यैस्तैस्तु त्यक्तावीक्षितेऽपत्यनाशः ॥ २ ॥

Apparatus :

4 °वश्मो° B, ग्रवा A.

5 सुरुपां मपि A.

6 लग्ने स्थिता E, योषिद्रहां° A, यषद्रहां° B, °कारणः AB, °संशयः E.

7 वरं E, °द्रेक्काणैः E, पुरुषांशैः E.

8 °स्थानास्थिते A, °स्थाने सिते E, लभ्या वरस्य सा कन्या विपरी° E.

9 °र्कगुरुभू° E, °धर्मशुभेष्वथ AB.

col. इति *om* B, श्री° to °वल्लभाख्ये *om* BE, कन्यावरणाध्याय E १०७ add. E.

1 title गर्भवासाध्यायः E, °कन्यककर्किनः E, °श्रमिणो E, उदयी च शिशू E.

2 वीर्यभजि A, क्षशुकक्षोणीजेज्यस्वांशकैर्दृष्टयुक्ते E, °जस्याधिपै° A, °दृष्टो A, ये तैस्तु त्यत्त्वा° E, यैस्तैस्तरयत्तवा° B, यैस्तो त्यत्तवा A, °वीक्ष्यते E.

शुक्रार्केन्दुक्षोणिजैः स्वांशके च लग्नस्थो वा धर्मगो वा सुरेज्यः ।
प्रष्टुर्निःसन्देहमाहुस्तदानीं सापत्यत्वं कश्यपाद्या मुनिंद्राः ॥ ३ ॥
पुत्रस्थानाधीश्वरौ यावता स्वं कालेनांशं प्राप्नुयात्खेचरेन्द्रः ।
तावान्नस्मिन् कीर्तितो गर्भसंस्थाकालः स्त्रीणां प्रश्नशास्त्रार्थविद्भिः ॥ ४ ॥

इति श्रीभोजराजविरचिते विद्वज्जनवल्लभाख्ये गर्भधारणाध्यायो द्वादशः ॥

विषमोपगते विलग्नतो रविपुत्रे सुतजन्म निर्दिशेत् ।
समवर्तिनि तत्र कन्यकाप्रसवं गर्गमुखाः पुनर्विदुः ॥ १ ॥
विपर्यये भांशकयोर्बलीयस्तदाश्रितं तत्फलमादधाति ।
शनैश्चरान्येऽपि खगाः स्युरेवं कार्येषु सर्वेष्वपि कश्यपाद्याः ॥ २ ॥
स्यात्पुंवर्गे लग्नगे वीर्ययुक्ते सूतिः पुंसः पुंग्रहालोकिते च ।
युग्मे नार्यः स्त्रीग्रहालोकभाजि ज्ञोपेते न स्त्री भवेद्गर्भसंस्था ॥ ३ ॥
सौम्योपेतः सौम्यदृष्टोऽष्टमर्क्षस्थायी नाथः पङ्कजानां यदि स्यात् ।
तस्माद्देशादन्यदेशं तदानीं प्राप्तो वाच्यं प्रसकाले नृजन्म ॥ ४ ॥
विषमे जीवतिग्मांशू स्यातां पुरुषजन्मदौ ।
युग्मे सितेन्दुभौमाः स्युः कन्ययोत्पत्तिकारिणः ॥ ५ ॥

इति श्रीभोजराजकृते विद्वज्जनवल्लभाख्ये जन्माध्यायस्त्रयोदशः ॥

Apparatus :

3 °क्षोणिजाः E, वा E, वीर्यगो E, सवेज्यः E

4 पुत्रस्थाधीश्वरो A, तावत्तस्मिन् E, कीर्ति A, गर्भसंस्थः ABE, °विज्ञः A.

col भोज° to °वल्लभाख्ये *om* BE, गर्भवासाध्यायो E.

1 title अथ पुत्रजन्माध्यायः E, कन्यका तदा प्रसवं E.

2 °र्बलीयांस्तदा ततः स्वं E, फलमाददाति E, शनैश्चरोऽन्ये ABE.

3 स्यात्पूर्वगे A, नार्याश्रि° E, °ग्रहोलोक° AB, ज्ञोपते AB, ज्ञोऽपीत्ये° E, न *om* A, तु B, °वं E, स्त्रीभवे गर्भयुक्ता E.

4 °ष्टमर्त्यस्थायी AB, ऽथ मध्यस्थायी E, °दन्ये देशं E, प्राप्ति° E, वाच्यः AB, °र्वाच्या E नृजन्मा B, न जन्म A, च युक्ता E.

5 *om* E, जीवतिग्मांशुस्स्यातां A, °कारणः B, °कारणं A.

col. इति *om*. B, श्री° to °वल्लभाख्ये *om* BE, पुत्रजन्माध्यायः ॥ E.

चन्द्रार्कयोः स्मरगृहोपगतौ सितार्की
लग्नात्सुताष्टमगतौ यदि वा भवेताम् ।
यद्वा द्वितीयभवनोपगताविमौ स्तः
स्यात्प्रावृषि प्रबल एव तदाम्बुपातः ॥ १ ॥

जलराशिगतैः शुभग्रहैः सितपक्षे च तृतीयकेन्द्रगैः ।
जलराशिगतेऽथवा शशिन्युदयस्थे ध्रुवमादिशेज्जलम् ॥ २ ॥

पृच्छाकाले वित्तदुश्चिक्ययोश्चेदेको राशिर्जायते तोयसंज्ञः ।
यद्वा तिष्ठेत्तत्र तोयग्रहश्चेन्निःसन्देहं तोयपातस्तदा स्यात् ॥ ३ ॥

कुम्भमीनमकरा जलसंज्ञाः कर्किवृश्चिकतुलावृषभाश्च ।
सिंहमेषमिथुनप्रमदाख्या राशयो निगदितास्त्वजलाख्याः ॥ ४ ॥

शुष्काः कुजार्करविजा भृगुनन्दनश्च
शीतद्युतिश्च कथितौ जलसंश्रयौ तौ ।
स्यादाश्रयस्य वशतः सितरश्मिजन्मा
तद्वत्पतिश्च वचसामपरेऽमुथोक्ताः ॥ ५ ॥

राशीश्वरोऽर्थे यदि विक्रमे च शुभे युक्तो गगनेचरेण ।
तदा नदीपूरकरश्च सप्तविंशे दिने स्यात्सलिलस्य पातः ॥ ६ ॥

जलवत्यजलेन संयुते पयसोऽर्वाक्पतनं विनिर्दिशेत् ।
उपरीरितमन्यथा पुनर्बहुतोयं जलवृद्धये विदुः ॥ ७ ॥

Apparatus:

1 title वर्षलक्षणम् E, स्मरग्रहो° A, सुखाष्टम° E, द्वितीयसहजोप° E, तदानुपातः A.

2 शुभपक्षे B °ऽर्थंतृतीय° E.

3 °दुश्चित्क° E, °न्निसंदिग्धं E.

4 कुम्भ° *om* AB, मेष° suppl. B °मिथुनः AB, °प्रमदाश्च E, निगदिताः सजलाख्याः E.

5 कुजर्क° B, जलसंज्ञितौ द्वौ E, परतः E, तत्यद्युतिश्च B, तत्यधृतिश्च A, मथोक्ताः AB, corr to मघोक्ताः B, र्यथोक्ताः E.

6 च] वा E, गमने° A, °चरो वा E, °करस्य E, °कश्च A, सप्तात्रिंशे B, सप्तविंश° E, °द्दिने E, स्यात्सुजलस्य E.

7 पयसः संपतनं E, उपरीरीतिम° A, जवृद्धये A, जलजे द्वयो° E, °र्विदुः E.

शशभृतो दिवि वज्रभृतोऽपि वा मधुरवाग्बलभुग्यदि वासते ।
समभिपृच्छति देहभृति ध्रुवं निपतनं सलिलस्य तदादिशेत् ॥ ८ ॥
वर्षाप्रश्ने प्रावृषीन्दुर्जलर्क्षे शुक्ले पक्षे लग्नतः केन्द्रगो वा ।
सौम्यैर्दृष्टो भूरितोयं विमुञ्चत्यल्पं पापैश्चन्द्रवद्भार्गवेऽपि ॥ ९ ॥
शुभेक्षितः प्रावृषि शीतरश्मिर्भृगोः सुतात्ससमराशिवर्ती ।
यद्वार्कपुत्रान्नवपंचमस्थः स्मरस्थितो वापि जलागमाय ॥ १० ।
नदीतीरे कूपे सरसि सरसे पल्वलतटे
समभ्यर्च्य ज्योतिर्विदमवनिदेशेऽथ हरिते ।
तदा पृच्छन् प्रष्टा जललुलितपाणिः स्पृशति वा
तदा सार्धं सद्यः प्रकिरति तदाम्भो जलधरः ॥ ११ ॥
तोयासन्नस्तोयकार्योन्मुखो वा प्रष्टा चेत्स्यात्संस्पृशेद्वाम्बुसंज्ञम् ।
तोयार्थाना प्रश्नकाले श्रुतिर्वा तस्मिन् वाचां तत्र निर्देश्यमम्भः ॥ १२ ॥

इति श्रीभोजराजविरचिते विद्वज्जनवल्लभाख्ये वृष्ट्यध्यायश्चतुर्दशः ॥

यदि कष्टकवर्तिनः शुभाः स्युर्यदि वैकादशवेश्मगा विलग्नात् ।
धनवद्गृहमादिशेत्तदानीं द्वारं तस्य दिशि ब्रुवन्ति तज्ज्ञाः ॥ १ ॥
यस्मिन् भागे वेश्मनः सन्ति सौम्यास्तावद्द्रव्यस्याश्रयस्तत्र वाच्यः ।
यस्मिन् पापाः खेचरास्तत्र भागे शल्यस्योक्तः संश्रयः प्रश्नकाले ॥ २ ॥

Apparatus :

8 दिशि AE, मधुरर्वाक् B, मधुर्वाक् A, बलिभु° AE, वासते] स्थितः E, समभिविष्यति E, देहभृतं E, निपनं A, तदा भवेत् E.

9 वर्षप्रश्ने E, पक्षे *om* A, लग्नगः E, सौम्यादृष्टो E, °श्चन्द्रविद्वानवोऽपि E.

10 सुतः सप्तम° E, यदार्कपुत्रो नव° E, पञ्चरथः A.

11 सरसि सरसे] नलिनरुचिरे E, ज्योतिविद° B, °मखिलदेवैर्विहरति E, यदा पृच्छेत्प्रष्टा E, तदा सा(न्)द्रं B, जलं जलमुगधिकम् E.

12 *om* E, तोयसन्न° A, संपृशे° A, निदेश्य° A.

col. श्री° to °वल्लभाख्ये *om* BE, वृष्ट्याध्याय° B, वृष्ट्याय° A.

1 title अथ नष्टद्रव्याध्यायः E, 1 *om* E.

2 भावे E, वेनः A, सौम्यास्तत्र E, द्रव्य° AE, सल्यस्तद्वत् E.

धिष्ण्ये समस्तेऽभ्युदिते विलग्ने विनिर्गते चन्द्रमसोऽपि यद्वा ।
प्राप्तिं निखातस्य वदेत्तदानीं कृतेऽपि यत्ने द्रविणस्य नैव ॥ ३ ॥
दशमे हिबुकेऽथ पंचमे दुश्चिक्ये नवमे तथोदये ।
यदि सन्ति शुभग्रहास्तदा ध्रुवमत्र द्रविणं न नश्यति ॥ ४ ॥

इति श्रीभोजराजविरचिते विद्वज्जनवल्लभाख्ये क्षिप्रधनार्चिताध्यायः पंचदशः ॥

होरागतो हिमकरः परिपूर्णमूर्तिर्दृष्टः सितेन यदि वा त्रिदशार्चितेन ।
नष्टस्य लाभमचिराद्विदधाति लाभस्थानोपगः प्रबलवीर्ययुतः शुभो वा ॥ १ ॥
स्थिरे विलग्ने यदि वा स्थिरांशे वर्गोत्तमे वापि विलग्नयाते ।
तत्रैव वाच्यं स्थितमेव नष्टद्रव्यं स्वकीयेन च तद्गृहीतम् ॥ २ ॥
निर्देश्यमादिमध्यप्रान्तेषु विलग्नतो दृक्काणेषु ।
द्रव्यं द्वारोद्देशे [गृह]मध्ये भवनावसाने च ॥ ३ ॥
पूर्णो विधुर्यदि विलग्नगतः शुभो वा मूर्धोदये भवति सौम्यविलोकितश्च ।
नष्टस्य लाभमचिराद्विदधाति नूनं लाभोपगोऽतिबलवानशुभेतरश्च ॥ ४ ॥
तोये वित्ते विक्रमे पंचमे वा षष्ठे वा स्यात्खेचरेन्द्रः शुभश्चेत् ।
नष्टद्रव्यस्याशु लब्धिं तदानीं ब्रूयात्तस्यासन्नदेशस्थितं वा ॥ ५ ॥
ब्रयादेवं खेचरैः कण्टकस्थैर्यद्वा लग्नर्क्षादमीषामभावे ।
मध्यभ्रष्टैरंशकैर्वा विलग्नाद्वाच्यान्यस्मिंश्चाध्वनो योजनानि ॥ ६ ॥

Apparatus :

3 दिष्टे समग्रे E, ऽपि] हि E, प्राप्ते E, भवेत्तदानीं E, क्ररे E, यत्नो E, नैवम् E.
4 दुश्चित्के E, °स्ततो E, पश्यति E.
col. श्री° to °वल्लभाख्ये *om* BE, निक्षिप्तधनाध्यायः E.

1 लब्ध° E.
2 वाध E, स्थितये E, विनष्टं द्रव्यं E.
3 दृक्काणेषु E, गृह° *om*. ABE.
4 मूढोदये E, 4 c-d *om*. AB; cf. 1 c-d.
5 शुभस्य AB, लब्धं E, लब्धिस्त° E, °स्यासन्निवेशस्थितिं च E.
6 ब्रूयाद्वासं AB, मध्यादृष्टेरं° E.
मध्याभ्रष्टे पंचमनवमांशात् (1 blank line) नवमांशाद्वात्वादि द्रेकाणरूपैः (crossed out) रंशकैर्वा A, मध्याभ्रष्टेरंशकैर्वा (with पञ्चमनवमांशात् written above) B, °स्मिन्नध्वनो E.

द्रव्यमंशकतश्चोरान् द्रेक्काणैरादिशेत्सुधीः ।
दिग्देशकालान् राशिभ्यो वयो जातिश्च लग्नपात् ॥ ७ ॥

लग्नप्राप्ताः प्रापयन्ति स्वकाष्ठा मेषाद्याः स्वै राशयः खेचरैश्च ।
संपश्यन्तो लग्नसंस्थाश्च वित्तं यानं यद्वा वासराधीश्वराद्वा ॥ ८ ॥

अर्काद्यंशे विच्युते च द्विबाहुः शैलेष्वङ्काङ्गानि सङ्ख्याः क्रमेण ।
स्युर्गव्यूतिक्रोशहस्ता वितस्तिर्यद्वापीदं कीर्तयेदङ्गुलानि ॥ ९ ॥

द्रेक्काणः स्याद्यत्स्वरूपो विलग्ने तस्यादेशः खेचरो वापि यादृक् ।
वर्णागत्या वेष्टिते वेक्षिते वा तुल्यः स्तेनस्तेन निर्देश्य एव ॥ १० ॥

नाम्ना सत्वेनोजसा वेषशीलाकारैर्यादृक् स्याद्ग्रहः केन्द्रसंस्थः ।
नाम्ना सत्वेनोजसा वेषशीलाकारैः स्तेनं तादृशं कीर्तयन्ति ॥ ११ ॥

इति [श्रीभोजराजविरचिते विद्वज्जनवल्लभाख्ये] नष्टद्रव्याध्यायः षोडशः ॥

वृद्धिश्चतुर्थभवनान्मदनान्निवृत्तिर्लग्नाच्च्युतिः प्रवसनं दशमर्क्षतश्च ।
पृच्छाविलग्नसमये खचरैश्च वाच्या प्राप्ताः गृहं हिबुकवेश्मनि तु प्रवासी ॥ १ ॥

यो यः स्वेशेनेक्षितो वान्वितो वा भावः सौम्यैर्वा ग्रहैस्तस्य तस्य ।
वृद्धिर्हानिः क्रूरयोगे क्षणे स्यादित्यादेश्यं प्रश्नतो जन्मतो वा ॥ २ ॥

लग्ने शुभग्रहयुते यदि वान्यवर्गे शीर्षोदये यदि हि सिद्धिमुपैति कार्यम् ।
एतद्विपर्ययमुशन्ति न सिद्धिहेतुं मिश्रीभवत्यपि हि पृच्छत एव सिद्धिः ॥ ३ ॥

।
॥ ४ ॥

।
॥ ५ ॥

Apparatus :

7 १ द्रव्यमंशकतश्चोरान् (in marg. १ नवमांशाद्धात्वादि) B, द्रव्यमंशगतं चोरं E, नवमांशाद्धात्वादितश्चोरा A, २ द्रेक्काणैराशिजेत् (in marg. २ द्रेक्काणरूपैः) B, द्रेक्काणरूपैः राशिजेत् A.

8 *om*. E. लग्नप्राप्तः AB, स्वकष्टा A, स्वे AB, यातं B.

9 स्वाद्विपाहः १५ AB, शैलें ७ B, शैलं ७ A, शैंवे° E, from this point to 17, 7 b *om* AB : 22 blank lines in A, in marg. ग्रंथा विसृष्टास्स्युः B.

10 रूपे E.

col. श्री° to °वल्लभाख्ये *om* E.

4-7 *om* E, 7 यंगास्य A, यंगास्या B, त्तथैवा B, °मधोमधोमुखी A, °स्ताद्गणये° AB.

।

॥ ६ ॥

[ति]र्यगास्या ।

तथैव गन्तव्यमधोमुखी स्यादालग्नतस्ता गणयेत्समस्ताः ॥ ७ ॥

होरायां स्यादुच्छ्रयस्तूर्ध्वमुख्यां तिर्यक्स्थानैश्वर्यभूतिस्त्वनल्पः ।
प्रष्टुर्यातस्याथवारम्भिणो वा यद्वा यातव्यस्य निर्देश्य एव ॥ ८ ॥

अधोमुखी स्याद्यदि पृच्छकस्य तदा धनस्थानविभूतिवीर्यैः ।
न पूज्यते नो रमते हतः स द्विड्भिस्तदा वाहनतः पतेच्च ॥ ९ ॥

चेष्टासु सर्वासु विपत्तिमेत्य गच्छन्ति सर्वेऽपि हि तिर्यगर्थाः ।
तिर्यङ्मुखायामत एव तस्यां कार्याण्यशेषाणि समारभेत ॥ १० ॥

वृषतुलाघटकेसरिणः शुभैर्यदि भवन्ति नभस्यवलोकिताः ।
तनुभृतां कथयन्ति शुभं तदा बलभृतो यदि वोदयमागताः ॥ ११ ॥

नाशोऽर्थस्य व्यापदो भीतिभीतं सन्देहः स्यान्नापि मृत्योश्च मृत्यौ ।
व्याधेर्यद्वा संश्रितस्योपशान्ति स्थानं प्राप्तेष्वेषु मेषूरणाख्यम् ॥ १२ ॥

कन्या मेषो वृश्चिकः कर्कटो वा मध्यं व्योम्नः संश्रितः सौम्यदृष्टः ।
नष्टस्यार्थस्याशु लाभं विधत्ते रोगान् प्रष्टुः स्पष्टमुच्चारयेच्च ॥ १३ ॥

मृगतुरङ्गझषा जितुमस्तथाशुभयुता न शुभेतरवीक्षिताः ।
मुषितमर्थचयं वितरन्त्यमी नियतमम्बरमध्यमधिष्ठिताः ॥ १४ ॥

Apparatus :

8 °यश्चोर्ध्वमुख्यां E, तिर्यक् *om* AB, °विभूतिष्वनल्पः AB, प्रष्टुर्जात° E, °वारम्भणे E, यद्वा A, यातन्यस्य AB, यातस्येति E, निर्देश्यमेव AB.

9 अधोमुखे E, युज्यते E, सन् ABE, विद्भिस्तदा AB, द्विर्द्विस्तथा E, परेभ्यः E.

10 विपत्य ×× गच्छन्ति E, तीर्थगर्थाः AB, कः स्यात् E, कार्याणि सर्वाणि E, समारभेच्च E.

11 विलोकितान्विताः E, बलयुता E.

12 नाशो न स्याद्व्यापदश्छिन्नभीः स्यात् E, °भीतः AB, स्यानापमृत्युश्च मृत्योः B, स्यानापमृश्च मृत्योः A, व्याधेर्यः स्या ×श्रितस्योपशान्तिः E, मेषूरणाख्यां A.

13 कर्कटः स्यान्मध्ये E from here through 18, 2 *om* E, सौम्यदृष्टाः AB.

13/14 शु लाभं to युता न *om* A, 12 °मुच्चारयेश्च B.

शुभग्रहयुतास्तस्मिन्नेत एवोक्तराशयः ।
नृणां भवति रोगादि चतुष्टयविधायिनः ॥ १५ ॥

राशिर्विलग्नगो यस्तु तत्कालच्छायया हतः ।
सप्तोद्धृतोऽवशिष्टं तु गुणकैर्गुणयेत्ततः ॥ १६ ॥

५, २१, १४, ९, ८, ३, ११
बाणप्रकृतिमन्वङ्कद्विरदानलशूलिनः ।
सर्वपृच्छासु गुणकाः सूर्यादीनामिमे क्रमात् ॥ १७ ॥

पुनः सप्तविभक्तेऽस्मिन् यदि सौम्योदयो भवेत् ।
प्रष्टुस्तदा कार्यसिद्धिर्न तु पापग्रहोदये ॥ १८ ॥

एकसप्ततिसंभक्ते शेषे तद्वर्गशोधिते ।
न शुद्धिमेति यद्वर्गः कालं तद्वशतो वदेत् ॥ १९ ॥

दिनान्यर्कारयोः शेषं पक्षाः शुक्रहिमत्विषोः ।
गुरोर्मासा शनेर्वर्षाण्यृतवः शशिजन्मनः ॥ २० ॥

आधानलाभालाभादिविजयेषु गमागमे ।
शत्रूणां च विनाशेषु कालं ब्रूयाद्यथोदितम् ॥ २१ ॥

इति श्रीभोजराजविरचिते विद्वज्जनवल्लभाख्ये मिश्राध्यायः सप्तदशः ॥

स्वांशस्थितो भजति लाभगतं निजांशं प्राप्तं त्रिकोणमुत पश्यति धातुचिन्ता ।
जीवं परांशकगते खचरे परांशमालोकयत्यथ परांशकभाजि मूलम् ॥ १ ॥

प्रोक्तौ धातू क्षोणिजन्मोष्णरश्मी मूलाख्याः स्युश्चन्द्रमासौम्यसौराः ।
जीवाभिज्ञौ दैत्यपूज्यामरेज्यौ यस्यांशे स्यादिन्दुजः सा तु योनिः ॥ २ ॥

Apparatus :

15 एवोत्तराशयः AB, (क्त written above त्त in B).

16 °लग्नमो A, यस्तु ततत्काल° A, सप्तोद्धृतावशिष्टस्तु B, सप्तोधृतावशिस्तु A.

19 शषे AB, शुद्धि ममेति AB, (मे written above ममे in B).

21 °लाभलाभादि° AB.

col. श्री° to °वल्लभाख्ये *om* B, मिश्राध्यादः B.

1 स्वांशास्थितो A, परांशकमालोक° B, परांशकमलोक° A.

2 धातु A, °रश्मी (sic !) A, order of verses in E, 7, 3, 9.

धातुर्मूलं भवति च तथा जीवमित्योजराशो
युग्मे चास्मिन् द्वयमपि भवेदेतदेव प्रतीपम् ।
लग्ने योंऽशः स खलु सुधिया गण्य एव क्रमात्स्यात्
संक्षेपोऽयं नियतमुदितो विस्तरात्तत्प्रभेदाः ॥ ३ ॥
बालामिन्दुश्चन्द्रजन्मा कुमारीं वृद्धामार्की जीवसूर्यौ प्रसूताम् ।
शुक्रोर्वीजौ कर्कशाङ्गां विधत्ते – – – – स्याद्वयः पूरुषेऽपि ॥ ४ ॥
लग्नप्राप्तैः स्याद्धि तुल्यः सुतस्थैः पुत्रो भ्राता खेचरैर्विक्रमस्थैः ।
माता वा स्यादम्बुयातैः स्वसा वा शत्रुः स्वारिस्थानगैः कल्पनीयः ॥ ५ ॥
भार्या जामित्रोपगैर्धर्मयुक्तो धर्मप्राप्तैरम्बरस्थैर्गुरुर्वा ।
स्वांशाधीशे मित्रताभाजि रात्रौ वीर्योपेते वाच्यमेतत्तथैव ॥ ६ ॥
चरे विलग्ने चरभांशके च प्रवासिचिन्ता नभसि च्युते च ।
भ्रष्टे ग्रहे सप्तमराशितः स्यात्पुनर्निवृत्तौ यदि नैव वक्री ॥ ७ ॥
अस्तोपगैः शुक्रकुजाब्जनाथैः पराङ्गनास्वामिनमेज्यपूज्यम् ।
चन्द्रे वदेत्प्रीणवधूपतिं वा सौरेऽन्त्यजानां शशिनन्दने च ॥ ८ ॥
आज्ञैवाखिलचारिराशिरचनाविच्छेदनीं मेदिनीं
शास्त्येकां नगरीमिव प्रतिहतप्रत्यर्थिनो यस्य सा ।
प्रश्नज्ञानमिदं स पार्थिवशिरोविन्यस्तपादाम्बुजः
श्रीविद्वज्जनवल्लभाख्यमकृत श्रीभोजराजः कृती ॥ ९ ॥

इति श्रीभोजराजविरचिते विद्वज्जनवल्लभाख्ये चिन्ताध्यायोऽष्टादशः ॥

Apparatus :

3 तथा] धनं E, चास्मिन्] राशौ E, त्वयमपि E, प्रदीपां A, सकलसुधिया E, गण्यमेव E, क्रमस्यात् A, °मुदितं E, विस्तरादत्र भेदम् E, 4-6 *om* E.

4 बालागिन्दु° A, प्रसूतं A, space of 4 aksaras in B, no space in A, पुरुषे A.

5 राशितुल्यः AB.

6 धर्मप्रादौर° B, धर्मप्रदौर° A, B ends with मित्रताभा.

7 च'] वा E, नभसश्चरेण E, सप्तमराशिसंस्थे E, पुनर्निवृत्तिर्यदि E.

8 *om* E, पराङ्गनानां स्वाममरेज्यपूज्यः A, प्राणवधूबुधे A, शशि-द्वयश्च A.

9 आज्ञ×दाखिलवारिराशिरशना ×× दिनी मेदिनी E, °रचनावच्छे A, शास्त्रैकां E, नगरीमवि E, प्रत्यर्थिपृच्छं फलं E, °मकरोच्छ्रीभोजदेवो नृपः E.

col. श्रीभोजराजविरचिते *om* E, विद्वज्जनवल्लभे E, धातुसूनजीवचिन्ताध्यायः E, ऽष्टादशः *om* E.